M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref. / Ser. 808

Title: Jwara Stotra

Jaina

808

ज्वर स्तोत्र

| | |
|---|---|
| Jwara Stotra | Title |
| | Author |
| | Editor |
| | Year, Vols. |
| | Publisher |
| 808 | Remarks |

श्रीगणेशायनमः ज्वरस्तोत्रं युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशारद। अत्र
१ वृत्रवधादेवाविवक्षासमजायत १ ज्वरेणमोहितोवृत्रः कथितस्तेजनाधिप। निहतोवासवेनेह
वज्रेणेतिमयानघ २ कथमेषमहाप्राज्ञज्वरप्रादुर्भवः कुतः ज्वरोत्पत्तिंनिपुणतः श्रोतुमि
च्छाम्यहंविभो ३ भीष्मउवाच शृणुराजन्ज्वरस्येहसंभवंलोकविश्रुतं विस्तरंचापिव
क्ष्यामियादृशश्चैषभारत ४ पुरामेरोर्महाराजशृंगंत्रैलोक्यविश्रुतं ज्योतिष्कंनामसा
वित्रंसर्वरत्नविभूषितं ५ अप्रमेयमनाधृष्यंसर्वलोकेषुभारत तत्रदेवोगिरितटेहेमधा
तुविभूषिते ६ पर्यंकइवविभ्राजन्नुपविष्टोबभूवह शैलराजसुताचास्यनित्यंपार्श्वे
स्थिताबभौ ७ तथादेवामहात्मानोवसवश्चमहायशाः तथैवचमहाभागावश्विनो १
भिषजांवरौ ८ तथावैश्रवणोराजागुह्यकैरभिसंवृतः यक्षाणामधिपः श्रीमान्कैला
सनिलयप्रभुः ९ उपासतमहात्मानमुशनाचमहाकविः सनत्कुमारप्रमुखास्तथैवच
महर्षयः १० अंगिरप्रमुखाश्चैवतथादेवर्षयोपरे विश्वावसुश्चगंधर्वास्तथानारद

पर्वतौ ११ अप्सरोगणसंघाश्चसमाजग्मुरनेकशः ववौसुखःशिवोवायुर्नानागं
धवहःशुचिः १२ सर्वर्तुकुसुमोपेताःपुष्पवंतोमहाद्रुमाः तथाविद्याधराश्चैवसिद्धा
श्चैवतपोधनाः १३ महादेवंपशुपतिंपर्युपासंतभारत भूतानिचमहाराजनानारू
पधराण्यथ १४ राक्षसाश्चमहारौद्राःपिशाचाश्चमहाबलाः बहुरूपधराहृष्टाना
नाप्रहरणोद्यताः १५ देवस्यानुचरास्तत्रतस्थिरेचानलोपमाः नंदीचभगवांस्तत्रदेव
स्यानुमतेस्थितः १६ प्रगृह्यज्वलितंशूलंदीप्यमानंस्वतेजसा गंगाचसरितांश्रे
ष्ठा सर्वतीर्थजलोद्भवा १७ पर्युपासतदेवेशंरूपिणींकुरुनंदन एवंसभगवांस्तत्रप्र
ज्यमानःसुरर्षिभिः १८ देवैश्चमहाभागैर्महादेवोव्यतिष्ठत कस्यचित्त्वथकाल
स्यदक्षोनामप्रजापतिः १९ पूर्वोक्तेनविधानेनयक्ष्यमाणोन्वपद्यत ततस्तस्य
मखेदेवाःसर्वेशक्रपुरोगमाः २० गमनायसमागम्यबुद्धिमापेदिरेतदा तेवि

मानैर्महात्मानोज्वलितैर्ज्वलनप्रभाः २१ देवस्यानुमतेगच्छन्गंगाद्वारमितिश्रुतिः प्रस्थि
तान्देवतान्दृष्ट्वाशैलराजसुतातदा २२ उवाचवचनंसाध्वीदेवीपशुपतिंपतिं भगव
२ न्क्वनुयान्त्येतेदेवाःशक्रपुरोगमाः २३ ब्रूहितत्त्वेनतत्त्वज्ञसंशयोमेमहानयं महेश्वरउवा
च दक्षोनाममहाभागेप्रजानांपतिरुत्तमः २४ हयमेधेनयजतेतत्रयान्तिदिवौकसः उ
मोवाच यज्ञमेतंमहाभागकिमर्थंनाभिगच्छसि २५ केनवाप्रतिषेधेनगमनंतेनविद्यते
ईश्वरउवाच सुरैरेवमहाभागेसर्वमेतदनुष्ठितं २६ यज्ञेषुसर्वेषुममनभागमुपक
ल्पितः पूर्वोपायोपपन्नेनमार्गेणवरवर्णिनि २७ नमेसुराःप्रयच्छन्तिभागंयज्ञस्य
धर्मतः उमोवाच भगवन्सर्वदेवेषुप्रभावोप्यधिकोगुणैः २८ अजेयश्चाप्यधृष्य
श्चतेजसायशसाश्रिया अनेनतेमहाभागप्रतिषेधेनभागशः २९ अतीवदुः २
खमुत्पन्नंवेपथुश्चममानघ भीष्मउवाच एवमुक्त्वातुसादेवीदेवंपशुपतिंप
तिं ३० तूष्णींभूताभवद्राजन्दह्यमानेनतेजसा अथदेव्यामतंज्ञात्वाहृद्गतं

यच्चिकीर्षितं ३१ ससमाज्ञापयामासतिष्ठत्वमितिनंदिनं ततोयोगबलंकृत्वा
सर्वयोगेश्वरेश्वरः ३२ तंयज्ञंसुमहातेजाभीमैरनुचरैस्तदा सहसाघातयामास
देवदेवःपिनाकधृक ३३ केचिन्नादानमुंचन्तकेचिद्धासांश्चसर्जिरे रुधिरेणापरेरा
जन्तत्राग्निंसमवाकिरन् ३४ केचिद्यूपान्समुत्पाट्यबभ्रमुर्विकृताननाः आस्यै
रन्येचाग्रसंस्तत्रतथैवपरिचारकान् ३५ ततःसयज्ञोनृपतेवध्यमानःसमंततः आ
स्थायमृगरूपंवैखमेवाभ्यपतत्तदा ३६ तंतुयज्ञंतथारूपंगच्छन्तमुपलभ्यसः धनुरा
दायबाणंचतदान्वसरतःप्रभुः ३७ ततस्तस्यसुरेशस्यक्रोधादमिततेजसः ललाट
टात्प्रसृतोघोरःस्वेदबिंदुर्बभूवह ३८ तस्मिन्पतितमात्रेतुस्वेदबिंदौतथाभुवि
प्रादुर्बभूवसुमहानग्निःकालानलोपमः ३९ ततश्चाजायततदापुरुषःपुरुषर्ष
भ ह्रस्वोतिमात्ररक्ताक्षोहरिश्मश्रुर्विभीषणः ४० ऊर्ध्वकेशोतिरोमांगोभी

ज्वरस्तो॰ वर्णांगस्तथैवच करालः कृष्णवर्णश्च रक्तवासास्तथैवच ४१ तंप्रसंसमहासत्वोद्द
एक्षक्षमिवानलः देवाश्चाभ्यद्रवन्सर्वेभ्रुपलभ्यतदाप्रभुः ४२ पितामहोमहादेवंदर्श
३ यन्प्रत्यभाषत ब्रह्मोवाच भवतोपिसुराःसर्वेभागंदास्यंतिवैप्रभो ४३ क्रियतांप्रति
संहारःसर्वदेवेश्वरत्वया इमाहिदेवताःसर्वाऋषयश्चपरंतप ४४ तवक्रोधान्महादे
वनशांतिमुपलेभिरे यश्चैवपुरुषोजातःस्वेदात्तेविबुधोत्तमः ४५ ज्वरोनामैषधर्म
ज्ञलोकेषुप्रचरिष्यति एकीभूतस्यनह्यस्यधारणेतेजसःप्रभो ४६ समर्थासकला
पृथ्वीबहुधासृज्यतामयं इत्युक्तोब्रह्मणादेवोभागेचापिप्रकल्पिते ४७ भगवंतंतथे
त्याहब्रह्माणममितौजसं परांचप्रीतिमगमदुत्स्मयंश्चपिनाकधृक् ४८ अवापच ३
तदाभागंयथोक्तंब्रह्मणासह ज्वरंचसर्वधर्मज्ञोबहुधाव्यभजत्तदा ४९ शांत्यर्थं
सर्वभूतानांशृणुतच्चापिपुत्रक शीर्षाभितापोनागानांपर्वतानांशिलातनुं ५० अपां

तुनीलिकांविद्यान्निर्मोकंभुजगेषुच खोरकःसौरभेयाणामूषरंपृथिवीतले ५१
पशूनामपिधर्मज्ञदृष्टिप्रत्यवरोधनं रंध्रागतमथाश्वानांशिखोद्भेदश्चबर्हिणां ५२
नेत्ररोगःकोकिलस्यज्वरःप्रोक्तोमहात्मना अवीनांपित्तभेदश्चसर्वेषामितिनः
श्रुतं ५३ शुकानामपिधर्मज्ञहिक्किकाप्रोच्यतेज्वरः शार्दूलेष्वथधर्मज्ञश्रमो
ज्वरइहोच्यते ५४ मानुषेषुतुधर्मज्ञज्वरोनामैषविश्रुतः मरणेजन्मनितथाम
ध्येचाविशतेनरं ५५ एतन्माहेश्वरंतेजोज्वरोनामैषदारुणः नमस्यश्चैवधर्म
ज्ञसर्वप्राणिभिरीश्वरः ५६ अनेनहिसमाविष्टोवृत्रोधर्मभृतांवरः व्यजृंभ
ततःशक्रःतस्मैवज्रमवासृजत् ५७ प्रविश्यवज्रंवृत्रंतुदारयामासभारत
दारितश्चसवज्रेणमहायोगीमहासुरः ५८ जगामपरमंस्थानंविष्णोरमित

तेजसः विष्णुभक्त्याहितेनेदं जगद्व्याप्तमभूत्पुरा ५८ तस्माद्यानिहतोपुत्रविष्णो
४ स्थानमवाप्तवान् इत्येषहत्रमाश्रित्यज्वरस्यमहतोमया ६० विस्तरःकथितःपुत्रकि
मन्यच्छ्रवीमिते इमांज्वरोत्पत्तिमदीनमानसः पठेत्सदायःसुसमाहितोनरः
राम· हरी विमुक्तरोगःससुखीसमायुतोलभेतकामान्सयथामनीषितान् ६१ ६
तिरगतिपर्वणिमोक्षधर्मेज्वरोत्पत्तिकथनमध्यायः समाप्तः श्रीमोहावरोपणाम्
श्रीः २ श्रीः ९ श्रीः ९ श्रीः २ श्रीः ९

८

राम·